# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवेम्बर–डिसेम्बर–२०१६

**कक्षा - शास्त्री -३ (Sem-5)** **गुणाङ्कः - ७०**

**विषयः–रामानुजवेदान्तः** **प्रश्नपत्रम्–८** **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - ०२/१२/२०१६** **कोड – CE 3.5.10** **सन्दर्भग्रन्थः- श्रीभाष्यम्**

( आदितः समन्वयाधिकरणपर्यन्तो भागः )

---

**( प्रथमान्वितिः )**

**प्रश्नः -१ कयोश्चिद् द्वयोः प्रश्नयोः सविशदमुत्तरं प्रदेयम् ।** **०८**

*(१) अथशब्दस्यार्थः यथाभाष्यं विवेचनीयः ।*

*(२) अध्ययनविधिः यथाग्रन्थं निरूपणीयः ।*

*(३) भक्तेः कर्माङ्गत्वं समर्थयत ।*

**प्रश्न–२** *(१) 'अथातो ब्रह्मजिज्ञासा' इति सूत्रस्य व्याख्यानं यथाभाष्यं विधेयम् ।* **०८**

**अथवा**

*(२) ब्रह्मशब्दस्यार्थं प्रतिपाद्य ब्रह्म जिज्ञास्यमस्ति न वेति यथाभाष्यं वर्णयत ।*

**प्रश्न–३ कमप्येकं विषयमवलम्ब्यैका टिप्पणी लेख्या ।** **०२**

*(१) मङ्गलाचरणम् ।* *(२) भाष्यलक्षणम् ।*

**प्रश्न–४ कयोश्चिद् द्वयोः प्रश्नयोः समाधानं कुरुत ।** **०२**

*(१) किन्नाम व्याख्यानम् ?* *(२) केन शब्देन पुरुषोत्तमोऽभिधीयते ?*

*(३) ध्यानस्य स्वरूपं किम् ?* *(४) 'विद्यायामृतमश्नुते' वाक्यस्यास्यार्थं लिखत् ।*

**( द्वितीयान्वितिः )**

**प्रश्न–५ अधस्तनेषु प्रश्नेषु द्वयोः समाधानं यथाभाष्यं विधेयम् ।** **०८**

*(१) अनुभूतेः दृश्यधर्मत्वं समर्थयत ।*

*(२) अहमर्थात्मत्वं सविशदं निरूपयत ।*

*(३) तमसो द्रव्यत्वं समर्थयत ।*

**प्रश्न–६** *(१) द्वा सुपर्णा सयुजेति श्रुत्यर्थं सविशदं वर्णयत ।* **०८**

**अथवा**

*(२) यथार्थख्यातेः स्वसिद्धान्तत्वं यथाभाष्यं दर्शयत ।*

**प्रश्न-७ वक्ष्यमाणेषु विषयेषु द्वयोरुपरि टिप्पणी कार्या ।** ०४

*(१) भेदाभेदवादः ।* *(३) परमात्मा ।*

*(२) निर्विकल्पकनिरूपणम् ।* *(४) शेषलक्षणम् ।*

**प्रश्न-८ अधोनिर्दिष्टेषु प्रश्नेषु पञ्चानां प्रश्नानामतिलघूत्तराणि यथाग्रन्थं प्रदेयानि ।** ०५

*(१) प्रत्यक्षं कतिविधम् ?*

*(२) किन्नाम संस्थानम् ?*

*(३) ब्रह्म सगुणं वा निर्गुणं वा ?*

*(४) सुषुप्तावहमर्थस्य स्फुरणमस्ति न वा ?*

*(५) आत्मा नित्योऽनित्यो वा ?*

*(६) किन्नाम क्षरम् ?*

*(७) जगज्जन्मादिकारणं किम् ?*

**( तृतीयान्वितिः )**

**प्रश्न-९ अधोनिर्दिष्टेषु प्रश्नेषु द्वयोः समाधानं यथाभाष्यं विधेयम् ।** ०८

*(१) जन्मादिसूत्रार्थं वर्णयत ।*

*(२) सप्तविधां संगतिं सविशदमुपपादयत ।*

*(३) शास्त्रयोनित्वात् इति सूत्रस्यार्थं प्रतिपादयत ।*

**प्रश्न-१०** *(१) जन्माद्यधिकरणप्रतिपादितसिद्धान्तं यथाभाष्यं निरूपयत ।* ०८

**अथवा**

*(२) समन्वयाधिकरणपूर्वपक्षं प्रतिपाद्य तत्सिद्धान्तः सविशदं निरूप्यताम् ।*

**प्रश्न-११ कमपि विषयद्वयमवलम्ब्य टिप्पणीद्वयं लेख्यम् ।** ०४

*(१) श्रीभाष्यम् ।* *(२) रामानुजाचार्यः ।*

*(३) ब्रह्म वेदान्तवेद्यम् ।* *(४) अधिकरणम् ।*

**प्रश्न-१२ अधस्तनप्रश्नेषु केषाञ्चित् पञ्चानामतिलघूत्तराणि यथाधीतपाठ्यग्रन्थं लिखत ।** ०५

*(१) ब्रह्मसूत्रस्य द्वितीयं सूत्रं किम् ?*

*(२) श्रीभाष्यं केन विरचितम् ?*

*(३) ब्रह्मसूत्रस्य प्रथमाधिकरणस्य नामधेयं किम् ?*

*(४) भृगुः कस्य पुत्रः आसीत् ?*

*(५) जगत्कारणं ब्रह्म शास्त्रैकगम्यम् उत प्रमाणान्तरेणापि गम्यम् ?*

*(६) तत्तु समन्वयात् इत्यत्र तच्छब्देन किं प्रोक्तम् ?*

*(७) प्रयोजनं कतिविधं किञ्च तत् ?*